# श्री शिव कृत दुर्गा स्तोत्रम्

## श्री महादेव उवाच

रक्ष रक्ष महादेवि दुर्गे दुर्गति नाशिनि |
मां भक्त मनुरक्तं च शत्रुग्रस्तं कृपामयि || १ ||

विष्णुमाये महाभागे नारायणि सनातनि |
ब्रह्मस्वरूपे परमे नित्यानन्द स्वरूपिणी || २ ||

त्वं च ब्रह्मादिदेवाना मम्बिके जगदम्बिके |
त्वं साकारे च गुणतो निराकारे च निर्गुणात् || ३ ||

मायया पुरुषस्त्वं च मायया प्रकृतिः स्वयम् |
तयोः परं ब्रह्म परं त्वं बिभर्षि सनातनि || ४ ||

वेदानां जननी त्वं च सावित्री च परात्परा |
वैकुण्ठे च महालक्ष्मीः सर्वसम्प त्स्वरूपिणी || ५ ||

मर्त्यलक्ष्मी श्च क्षीरोदे कामिनी शेषशायिनः |
स्वर्गेषु स्वर्गलक्ष्मीस्त्वं राजलक्ष्मी श्च भूतले || ६ ||

नागादि लक्ष्मीः पाताले गृहेषु गृहदेवता |
सर्वशस्य स्वरूपा त्वं सर्वैश्वर्य विधायिनी || ७ ||

रागाधिष्ठातृ देवी त्वं ब्रह्मण श्च सरस्वती |
प्राणानामधिदेवी त्वं कृष्णस्य परमात्मनः || ८ ||

गोलोके च स्वयं राधा श्री कृष्णस्यैव वक्षसि |
गोलोकाधिष्ठिता देवी वृन्दावन वने वने || ९ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

श्रीरासमण्डले रम्या वृन्दावन विनोदिनी |
शतश्रृङ्गाधिदेवी त्वं नामन चित्रावलीति च || १० ||

दक्षकन्या कुत्र कल्पे कुत्र कल्पे च शैलजा |
देवमाता दिति स्त्वं च सर्वाधारा वसुन्धरा || ११ ||

त्वमेव गङ्गा तुलसी त्वं च स्वाहा स्वधा सती |
त्वदंशांशांशकलया सर्वदेवादि योषित: || १२ ||

स्त्रीरूपं चापिपुरुषं देवि त्वं च नपुंसकम् |
वृक्षाणां वृक्षरूपा त्वं सृष्टा चाङ्कुर रूपिणी || १३ ||

वह्नौ च दाहिकाशक्ति र्जले शैत्य स्वरूपिणी |
सूर्ये तेज:स्वरूपा च प्रभारूपा च संततम् || १४ ||

गन्धरूपा च भूमौ च आकाशे शब्दरूपिणी |
शोभास्वरूपा चन्द्रे च पद्मसङ्घे च निश्चितम् || १५ ||

सृष्टौ सृष्टिस्वरूपा च पालने परिपालिका |
महामारी च संहारे जले च जलरूपिणी || १६ ||

क्षुत्त्वं दया त्वं निद्रा त्वं तृष्णा त्वं बुद्धिरूपिणी |
तुष्टिस्त्वं चापि पुष्टिस्त्वं श्रद्धा त्वं च क्षमा स्वयम् || १७ ||

शान्तिस्त्वं च स्वयं भ्रान्ति: कान्तिस्त्वं कीर्तिरेव च |
लज्जा त्वं च तथा माया भुक्ति मुक्ति स्वरूपिणी || १८ ||

सर्वशक्ति स्वरूपा त्वं सर्वसम्प त्प्रदायिनी |
वेदेनिर्वचनीया त्वं त्वां न जानाति कश्चन || १९ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

सहस्त्रवक्त्र स्त्वां स्तोतुं न च शक्त: सुरेश्वरि |
वेदा न शक्ता: को विद्वान् न च शक्ता सरस्वती || २० ||

स्वयं विधाता शक्तो न न च विष्णु: सनातन: |
किं स्तौमि पञ्चवक्त्रेण रणत्रस्तो महेश्वरि || २१ ||

कृपां कुरु महामाये मम शत्रुक्षयं कुरु ||

इति श्री शिव कृत दुर्गा स्तोत्रं सम्पूर्ण

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133